ह्रीः

दुर्लभ बौद्ध ग्रन्थ शोध पत्रिका

A Review of rare buddhist texts

14

दुर्लभ बौद्ध ग्रन्थ शोध योजना
केन्द्रीय उच्च तिब्बती शिक्षा संस्थान
सारनाथ, वाराणसी
1992

दुर्लभ बौद्ध ग्रन्थ शोध पत्रिका

14

सम्पादक

प्रो० एस० रिनपोछे
योजना निदेशक

प्रो० व्रजवल्लभ द्विवेदी
उपनिदेशक

दुर्लभ बौद्ध ग्रन्थ शोध योजना
केन्द्रीय उच्च तिब्बती शिक्षा संस्थान
सारनाथ, वाराणसी
1992

बुद्धाब्द २५३६ **कार्तिक पूर्णिमा** **ख्रीस्ताब्द १९९२**

सहायक-मण्डल

पं० जनार्दन पाण्डेय
डॉ० बनारसी लाल
डॉ० टशी सम्फेल
डॉ० ठाकुरसेन नेगी
ठिनलेराम शाशनी
विजयराज वज्राचार्य

१४वाँ अंक, ५५० प्रतियाँ, १९९२

मूल्य : रु० ५५.

© केन्द्रीय उच्च तिब्बती शिक्षा संस्थान, सारनाथ, १९९२

प्रकाशक :
केन्द्रीय उच्च तिब्बती शिक्षा संस्थान
सारनाथ, वाराणसी

मुद्रक :
शिवम् प्रिन्टर्स
सी० २७/२७३ इण्डियन प्रेस कालोनी
मलदहिया, वाराणसी–२

Dhīḥ

A Review of rare buddhist texts

14

Editors

PROF. SAMDHONG RINPOCHE
Project Director

PROF. VRAJVALLABH DWIVEDI
Deputy Director

RARE BUDDHIST TEXT RESEARCH PROJECT
Central Institute of Higher Tibetan Studies
SARNATH, VARANASI

B.E. 2536 KĀRTIKA PŪRṆIMĀ C.E. 1992

Co-Editors

Pt. Janardan Pandeya
Dr. Banarsi Lal
Dr. Tashi Samphel

Dr. Thakur Sain Negi
Thinlay Ram Shashni
Vijay Raj Vajracharya

Vol. XIV, 550 Copies, 1992

Price : Rs. 55.

© Central Institute of Higher Tibetan Studies, Sarnath, 1992

Published by :
Central Institute of Higher Tibetan Studies
Sarnath, Varanasi

Printed by :
Shivam Printers, C 27/273, Indian Press Colony
Maldahia, Varanasi-2

धीः XIV

विषयानुक्रमणी

•

इमं चर्मपुटं तावत् स्वबुद्धौ च पृथक् कुरु ।
अस्थिपञ्जरतो मांसं प्रज्ञाशस्त्रेण मोचय ॥
अस्थीन्यपि पृथक् कृत्वा पश्य मज्जानमन्ततः ।
किमत्र सारमस्तीति स्वयमेव विचारय ॥

—तत्त्वरत्नावली

सत्त्वाराधन-गाथा

आर्यनागार्जुनकृता

[इस गाथा को जर्नल एशियाटिक (J. A.) अक्तू०–दिस० 1929, पृ० 264-265, में श्री सिल्वाँ लेवी ने **सत्त्वाराधनकारिका** शीर्षक से प्रकाशित किया था, जिसे डॉ० बनारसी लाल ने अपने संग्रह में रखा था। इसमें प्रारम्भ के 3 पद्य नहीं थे, सौभाग्य से भारतीय पण्डित बुद्धाकर वर्मा, अनुवादक भिक्षु धर्मप्रज्ञ द्वारा किया हुआ इसका तिब्बती अनुवाद प्राप्त हो गया। उसी के आधार पर प्रारम्भ के 3 पद्यों की रचना द्वारा गाथा को पूर्ण कर यहाँ दिया जा रहा है।]

सत्त्वार्थमेव मयि तिष्ठति सत्त्वश्रद्धा
नान्यत्र सा, ह्यहमहोऽधिगृहीतसत्त्वः।
चर्याऽधमा करुणया रहिता भवेद् या
संभाव्यते करुणयैव प्रहाणमस्याः॥ १॥

सत्त्वेषु यस्य नितरां करुणाप्रवृत्ति-
राराधकः स मम, शासनमर्मवेत्ता।
शीलं श्रुतिश्च करुणा च सुधीश्च यस्य
नित्यं स एव सुगतार्चनकृन्निगद्यते॥ २॥

कल्याणकारमधिकृत्य गतोऽस्मि सिद्धिं
सत्त्वार्थमेव तनुमेष समुद्वहामि।
नैवं क्रियेत यदि सत्त्वहितं मया चेद्
व्यर्थं करोमि तनुपोषणमन्नपानैः॥ ३॥

सत्त्वान् हिनस्ति मनसाऽपि हि यः स कस्मान्-
मामेव संश्रयति यो मयि निर्व्यपेक्षः।
पूजा तु सा भवति सत्त्वहितेक्षणापि
पूज्यस्य या मनसि तुष्टिमुपाददाति॥ ४॥

हिंसात्मिका परविहेठनसम्भवा वा
पूजा न पूज्यमनुगच्छति संस्कृताऽपि।
दाराः सुताश्च विभवश्च महत्त्व(च्च) राज्यं
मांसं च शोणितवसे नयने शरीरम्॥ ५॥

येषां प्रियत्वमधिकृत्य मयोज्झितं यद्
यस्तान् विहेठयति तेन विहेठितोऽहम् ।
सत्त्वोपकारपरमा हि ममाग्रपूजा
सत्त्वापकारपरया च पराभवः स्यात् ॥ ६ ॥

सत्त्वान् प्राप्य मया कृतानि कुशलान्याराधितास्तायिनः
प्राप्ताः पारमिताश्च सत्त्वसमितेरेवार्थमातिष्ठता ।
सत्त्वार्थेन समुद्यतेन मनसा मारस्य भग्नं बलं
सत्त्वैरेव तथा तथा विरचितं येनास्मि बुद्धः कृतः ॥ ७ ॥

कस्मिन् वस्तुनि सिद्धचतामिह कृपा मैत्री च क्वालम्बतां
क्वोपेक्षामुदितादिवस्तुविषयः कस्मिन् विमोक्षादयः ।
कस्यार्थे करुणापरेण मनसः क्षान्तिश्चिरं भाविता
न स्युर्जन्मनि जन्म[नि] प्रियविधौ मित्रं यदि प्राणिनः ॥ ८ ॥

सत्त्वा एव गजादिभावगतयो दत्ता मयाऽनेकशः
सत्त्वा एव च पात्रतामुपगतं देयं मया ग्राहिताः ।
सत्त्वैरेव विचित्रभावगमनादस्मत्कृपा वर्धिता
सत्त्वानेव न पालयामि यदि चेत् कस्यार्थमर्थः कृतः ॥ ९ ॥

संसारे व्यसनाभिघातबहुले न स्युर्यदि प्राणिनो
जन्मावर्तविडम्बनेन यमलोकं प्राप्य सात्मीकृताः ।
संसारोत्तरणं च सौगतमिदं माहात्म्यमत्यद्भुतम्
कस्यार्थेन समीहितं यदि न मे सत्त्वा भवेयुः प्रियाः ॥ १० ॥

यावच्चेदं ज्वलति जगतः शासनं शासनं मे
तावत् स्थेयं परहितपरैरात्मवद्भिर्भवद्भिः ।
श्रुत्वा श्रुत्वा मम विरचितं सत्त्वहेतोरखिन्नैः
खेदः कार्यो न च तनुमिममुक्तसारं भवद्भिः ॥ ११ ॥

इति सम्यक्सम्बुद्धभाषित-सत्त्वाराधनगाथा समाप्ता ॥

श्रीशाक्यसिंहस्तोत्रम्

[यह स्तोत्र स्व० श्री जगन्नाथ उपाध्याय जी के व्यक्तिगत संग्रह से प्राप्त अप्रकाशित स्तोत्रसंग्रह से लिया गया है। इस संग्रह का विवरण 'धीः' अंक 1 में दिया जा चुका है।]

नौमि श्रीशाक्यसिंहं सकलहितकरं धर्मराजं महेशं
सर्वज्ञं ज्ञानकायं त्रिमलविरहितं सौगतं बोधिराजम्।
धर्माधारं मुनीन्द्रं दशबलबलिनं श्रीघनं विश्वरूपं
संबुद्धं लोकनाथं सकलभयहरं संस्थितं मर्त्यलोके॥ १॥

यस्त्वं धर्माधिमेशं(पेशः) सकलजिनसुतैः संश्रितः श्वेतकेतु-
रित्याख्यां बोधिहेतुस्तदनु च तुषिता चागता बोधिराज।
मैत्रेयं स्थापयित्वा प्रमुदितमनसं स्वासने चाभिषिञ्च्य
मायागर्भे पवित्रेऽशुचिमलरहिते रत्नव्यूहे निवेश॥ २॥

गर्भे स्थित्वाऽपि यस्त्वं सकलहितकरीं धर्मव्याख्यां करोषि
काले मातुः सुकक्षात् सकलनिजकरैः काशयत् संप्रजातः।
लोकाचारं च कृत्वा विहितदशविधिं वै विवाहादि तत्तत्
त्यक्त्वा सर्वांश्च राज्यं सकलजनहिते निर्गतं त्वां नमेऽहम्॥ ३॥

ऊर्णाकोशाच्च यस्य प्रतिदिनमसकृद् दक्षिणावर्तरोचिः
प्रोद्यद्दीप्यमानत्रिभुवनकुहरध्वस्तमोहान्धकारम्।
चत्वारिंशत्सुदन्तोद्गलितकरचयैर्भासयन्नारकीयान्
प्रोद्धृत्वा स्वर्गलोके सुरतरुकलिते स्थापिता येन वन्दे॥ ४॥

यत्पाणी चक्रचिह्नावभिमतफलदौ दानपारङ्गतत्वा-
दुत्क्रान्ता भूमिदेवी स्वगणपरिवृता भेदयित्वाऽवनिं ताम्।
स्थित्वाग्रे पूजयित्वा नमुचिमभिगतं भर्त्सयित्वा द्विषन्तं
साक्षीभूता निलीना प्रणमितशिरसा त्वां नमेऽहं जिनेन्द्रम्॥ ५॥

यस्योद्ग्रीवस्य चाग्रे विधिहरमधुहल्लोकसंस्थैः प्रवीणै-
र्द्रष्टुं नैवाभिशक्या किमु मनुजपुरे वासितैर्मादृशैश्च।
ब्रह्माण्डं लङ्घयित्वा तरणिशशधरौ द्यौश्च नक्षत्रलोकम्
ऊर्ध्वं लोकोत्तराख्ये निजभुवनवरे भासितं त्वां नमेऽहम्॥ ६॥

यद्वक्त्रं पङ्कजाभं सुरदनवसनाकर्णिकाकेसराढ्यं
ब्रह्माण्डं जृम्भतेऽस्मिन् भुवनगणवृतं संश्रितं कर्णिकावत् ।
दृष्ट्वा संमूर्च्छितोऽभून्नमुचिरनुचरैस्त्राहि सर्वज्ञनाथ
कृत्वा केचित्प्रयाताः शरणमभिमतं श्रीघनं त्वां नमेऽहम् ॥ ७ ॥

संख्याज्ञानप्रवीणास्त्रिभुवनसदने पण्डिता ये वसन्ति
तैः सर्वैर्मीलयित्वा यदि तव महिमा वर्ण्यते कल्पकालम् ।
पारं गन्तुं समर्था नहि निखिलगुणक्षीरसिन्धोः कथञ्चि-
देकाकी किं समर्थस्तदपि मम मनो बोधनार्थं नमे त्वाम् ॥ ८ ॥

पठ्यन्ते स्तोत्रमेतत्सुरपतिरचितं स्रग्धरावृत्तसंज्ञं
शक्राद्या लोकपालाः प्रतिपदनुचराः संकरिष्यन्ति रक्षाम् ।
सौख्यं भुक्त्वेह लोके तदनु सुरपतेः कल्पवृक्षाभिकीर्णे
स्थित्वा गच्छन्ति चान्ते सुगतसुतमहीं सर्वलोकैकगम्याम् ॥ ९ ॥

सुरपतिकृतं शाक्यसिंहस्तोत्रं समाप्तम् ॥

दुर्लभ ग्रन्थ परिचय

—जनार्दन पाण्डेय—

[प्रस्तुत अंक में निम्नलिखित दुर्लभ ग्रन्थों का परिचय दिया जा रहा है—

1. डाकार्णवतन्त्रव्याख्या (वोहिता)

2. तत्त्वरत्नावलोक एवं तत्त्वरत्नावलोकविवरण

3-5. सहजालोकपञ्जिका, आर्याष्टाङ्गपोषधानुशंसा, दीर्घनखपरिव्राजकपरिपृच्छा

6. सर्ववज्रोदका

7. आर्यपञ्चविंशतिसाहस्रिका प्रज्ञापारमिता

8. बुद्धकपालतन्त्रटीका]

1. डाकार्णवतन्त्रव्याख्या (वोहिता)

ग्रन्थ—डाकार्णवतन्त्रव्याख्या (वोहिता)

पत्र संख्या—4, पंक्ति प्र० प० —6, अक्षर प्र० पं०—122

आधार—ताड़पत्र, **लिपि**—नेवारी, **अपूर्ण।**

प्रारम्भ

(उपलब्ध पत्रों से)

चिदाक्षी इत्यादिना। नी·····तन्त्रत इति श्रीसमाजादिषु नोक्तत्वादभिधानादिषु चेति। तत्र प्रसिद्धा तु तत्कथं नोक्ता इति। आह। रक्ष:संकेतेत्यादिनोक्तत्वाच्च मुद्राद्या·····तव्या·····तु पञ्चाद्यास्वह(?) द सर्वं सं·····

अन्त

·········वलिर्नानोपदेशेन वक्ष्यते टीकया मया।

इदानीं वलितत्त्वादित्रयोविंशतितमपटलव्याख्या। तदाह—अथ वलितत्त्वमित्यादिना। वप्रोदयात्तद्गतेति उद्देशपदम्, अस्य निर्देशं वक्ष्यमाणेन बाह्याध्यात्मिकम्। एवं यथा त्रिविधाभिधया प्रतिपाद्येदं किं कृत्वा तदित्याह। ·········न पञ्चाशत्तमपटलोक्तडाकार्णवसूक्तिमवलम्बयेत्तु योगीन्द्रः सर्वयोगानामत्र संयोगधारी, यथा देवेन्द्रः सर्वदेवानां राजा उत्तमस्तथा तत्तथोक्तः कवचादिरक्षाभि:। यथा कवचमन्त्रपटलेषु राजा उक्तस्तथा—

पुष्पिका

इति श्रीडाकार्णवे महायोगिनीतन्त्रराजे वोहितायां टीकायां परमाश्वस्य

चण्डिकायां रक्षाकवचमन्त्रेणानुत्तरविधिलक्षणव्याख्यानिर्देशो द्वाविंशतितमः पटलस्येति ।

विवरण

डाकार्णव तन्त्र की व्याख्या वोहिता के 4 प्रकीर्ण पत्र नेशनल आर्काइव्ज काठमांडू, नेपाल से शान्तरक्षित ग्रन्थालय में आये हैं। यह एक विशाल ग्रन्थ है, अतः इसकी टीका भी उतनी ही महत्त्वपूर्ण होगी, किन्तु हमें जो पत्र उपलब्ध हुए हैं, उनमें 22वें पटल का कुछ अंश, पुष्पिका और 23वें पटल की व्याख्या का उपक्रम मात्र है, इससे टीकाकार की भाषा, शैली और विद्वत्ता का संकेत मिलता है। न्यू कैटलाग्स कैटलागरम् की सूचनानुसार इसके रचयिता आचार्य पद्मवज्र हैं। अभी तक इस पूरी टीका की विद्यमानता का संकेत हमें कहीं से नहीं मिल पाया है।

2. तत्त्वरत्नावलोक एवं तत्त्वरत्नावलोकविवरण

ग्रन्थ—तत्त्वरत्नावलोक, तत्त्वरत्नावलोकविवरण

ग्रन्थकार—महापण्डित वागीश्वरकीर्ति

संख्या—ल० सं० 5/252

पत्रसंख्या—1-10, **पंक्ति प्र० प०**—8, **अक्षर प्र० पं०**-56

लिपि—नेवारी, **पूर्ण**।

प्रारम्भ

ॐ नमः श्रीसद्गुरुपादेभ्यः ।

अनुपमसुखरूपी श्रीनिवासो निवासो निरुपमदमदेवो रूपविद्यः सविद्यः ।
त्रिभुवनहितसौख्यप्राप्तिज्ञानोऽविकारो जयति कमलपाणिर्यविदाशाविकासाः ॥१॥
श्रीमन्त्रनीतिगतचारुचतुर्थसेकरूपं विदन्ति नहि येन नृशब्दशून्यम् ।
नानोपदेशगणसंकुलसप्तभेदस्तेषां स्फुटावगतये क्रियते प्रयत्नः ॥ २ ॥

अन्त

एभिः सर्वैरेव परमपि किञ्चित्साध्यं कथितादस्तीति भ्रान्तिर्न कर्तव्या। सुधनादि-कथितमेव साध्यमेभिः सर्वमभिधीयत इति निश्चयः ॥ १९ ॥

श्रीसमाजे परा यस्य भक्तिर्निष्ठा च निर्मला ।
तस्य वागीश्वरस्येयं कृतिर्विमतिनाशिनी ॥

विकचकुमुदक्षीरतारा(र)कुन्दानुकारि प्रचितमपि च पुण्यं यन्मया ग्रथ्नतोऽस्मात् ।
अनुपमसुखपूर्णः स्वाभविद्योपगूढो भवतु निखिललोकस्तेन वागीश्वरश्रीः ॥

पुष्पिका

तत्त्वरत्नावलोकः समाप्तः ।
तत्त्वरत्नावलोकविवरणं समाप्तम् ।
कृतिरियं पण्डिताचार्यवागीश्वरकीर्तिपादानाम् ॥

विवरण

यह ग्रन्थ डॉ० बनारसी लाल के व्यक्तिगत संग्रह से उपलब्ध हुआ है, जिसके आधार पर विवरण दिया गया है।

केवल १९ श्लोक और उनकी स्वोपज्ञटीका युक्त यह लघु ग्रन्थ वागीश्वरकीर्ति की अनुपम रचना है। इसमें तत्त्व की पहचान और सभी प्रकार की भ्रान्तियों का निराकरण किया गया है। पहले केवल मूल ग्रन्थ दिया है, फिर विवरण। ग्रन्थ अत्युपादेय है।

3-5. सहजालोकपञ्जिका, आर्याष्टाङ्गपोषधानुशंसा, दीर्घनखपरिव्राजकपरिपृच्छा

ग्रन्थ—सहजालोकपञ्जिका,
आर्याष्टाङ्गपोषधानुशंसा,
दीर्घनखपरिव्राजकपरिपृच्छा

संख्या—MBB-1973-150-153

पत्र संख्या-6 (प्रकीर्ण), **पंक्ति प्र० प०**—9, **अक्षर प्र० पं०**—52

आधार—ताड़पत्र, **लिपि**—नेवारी, **अपूर्ण**।

प्रारम्भ

(1) नमो मञ्जुघोषाय

प्रणम्य सर्वभावेन················वज्रिणः।
लिख्यते सहजालोकपञ्जिका श्रीयमद्विषः॥
तर्कागमविचारस्तु गूढः शुद्धधियामपि।
किं पुनर्मम मूढस्य शब्दमात्रमजानतः॥

(3) नमो बुद्धाय

एवं मया श्रुतमेकस्मिन् समये भगवान् राजगृहे महानगरे गृद्धकूटपर्वते महाभिक्षुसंघेन सार्द्धं तत्र खलु चतसृणां पर्षदां धर्मं देशयति स्म।

अन्त

(1) तदर्थं वजडाकिनीं भावयेत्, इति संबन्धः। खेत्याकाशं तदेव धातुः सर्वधर्माणां प्रकृतिर्यस्य मध्यं कूटागारं तद्गतं तन्मध्यगतं सूर्यमण्डलं चिन्तयेदिति भावयेत्। पञ्चशूलानि यस्य तस्यैकशूलं वज्रमित्यर्थः। पदमिति बीजाक्षरं 'बीजाक्षरं पदं प्रोक्तम्' इति वचनात्। (१३ वें पटल का अंश)

(2) नात्मना। ते च भिक्षवः सदेवमानुषासुरगन्धर्वाश्च लोका भगवतो भाषितमभ्यनन्दन्निति।

(3) अहं महाब्राह्मणः पूर्वजन्मोपेतमहाप्रमादस्थाना········

पुष्पिका

(1) आकर्षणादिप्रयोगोऽभिधीयते यस्मिन् पटले स तथा । सप्तमपटलव्याख्या ॥ सर्वोपयिकाकर्षणादिसंस्कारविशेषा निर्दिश्यन्ते यत्र स सर्वोपयिकविशेष-कस्तथोक्तः । द्वादशपटलव्याख्या ।

(2) आर्याष्टाङ्गपोषधानुशंसासूत्रं समाप्तम् । पोषधानुशंसा समाप्ता ।

(3) नहीं है ।

विवरण

इंडियन एडवांस स्टडी आफ वर्ल्ड रिलीजंस, न्यूयार्क से ये ६ प्रकीर्ण पत्र माइक्रोफिस प्लेट शान्तरक्षित ग्रन्थालय में आये हैं । इनमें 3 ग्रन्थों के पत्र मिले हुए हैं ।

(1) सहजालोकपञ्जिका—यह कृष्णयमारितन्त्र की टीका है, इसके 3 पत्र हैं । प्रारम्भ है, सप्तम और द्वादश पटल की पुष्पिका है । ताड़पत्र टूटा होने से पत्रांक नष्ट हो गये हैं, फिर भी 30 और 33 का अंक दीखता है, अर्थात् यह ग्रन्थ बड़ा होगा ।

(2) पोषधानुशंसा—इसका 1 ही पत्र है, जिसमें पुष्पिका है ।

(3) दीर्घनखपरिव्राजकपरिपृच्छा के दो पत्र हैं, पुष्पिका नहीं है ।

इनमें सहजालोकपञ्जिका उपयुक्त और शोधकर्ताओं के लिये अन्वेषणीय ग्रन्थ है ।

6. सर्ववज्रोदका

ग्रन्थ—सर्ववज्रोदका

ग्रन्थकार—महावज्राचार्य आनन्दगर्भपाद

संख्या—3/360/5

पत्रसंख्या—27, **पंक्ति प्र० प०**—6, **अक्षर प्र० पं०**—57

आधार—ताड़पत्र, **लिपि**—नेवारी, **अपूर्ण** ।

प्रारम्भ (उपलब्ध पत्र से)

········थ सकलसर्वसत्त्वपरमनिर्वाणप्रतिष्ठितार्थेन रत्नाकरो म आलम्बितमिति । ····सम्वत् अचृते (?)················विततमिति, ॐ वज्रसत्त्व समयं मेऽनुपालय वज्रसत्त्व त्वनायतिषु दृढो मे भव । सुसाध्यो मे भव । सुयाप्यो मे भव । अ········ मे भव । सर्वसिद्धि प्रयच्छ । सर्वकर्मसु च मे चित्तं स्तुयः कु फ ह्लं ह ह ह ह हाः भगवन् सर्वतथागत वज्रमासे मर्चो वज्री भव महासमय सत्त्व आः ॥

अन्त

ततश्च प्रोक्षणं रक्षासूत्रं च हृदयालम्भनं च कुर्यादिति ।

वज्रसत्त्वादि मे सर्वं सर्वसिद्धिप्रदायिकाम् ।
सर्ववेदोपमां कृत्वा यन्मया याचितं शुभम् ॥

आनन्दगर्भविद्याग्रः सर्वसत्त्वैकबान्धवः ।
अशेषस्तुतलाभस्तु महावज्रधरो विभुः ॥

पुष्पिका

श्रीमदार्यसर्वतथागततत्त्वसंग्रहमहायानाभिसमयाद् महातन्त्रराजादुद्गता वज्र-धातुमहामण्डलोपायिका सर्ववज्रोदका नाम समाप्ता ।
कृतेयं महावज्राचार्यानन्दगर्भपादैरिति ।

विवरण

यह ग्रन्थ नेपाल-जर्मन मैनु० प्रिजर्वेशन प्रोजेक्ट नेशनल आर्काइब्ज काठमांडू, नेपाल से शान्तरक्षित ग्रन्थालय में प्राप्त हुआ है, जिसके आधार पर उक्त विवरण दिया गया है।

यह सर्वतथागततत्त्वसंग्रह के मात्र पहले पटल वज्रधातुमहामण्डल की टीका है। ग्रन्थ ताड़पत्र पर लिखा गया है और ताड़पत्र टूट जाने से बीच-बीच में खण्डित हो गया है। पत्रों में पत्रांक नहीं हैं, इससे ग्रन्थ का क्रम लगाना श्रमसाध्य हो गया है। लेख अत्यन्त स्वच्छ और सुन्दर है। संभव है यह टीका पूरे ग्रन्थ पर लिखी गई हो, किन्तु हमें इतना ही अंश उपलब्ध हो पाया है।

ग्रन्थ में 'इति अधिवासनविधिः', 'इति भूमिसंशोधनपरिग्रहविधिः', 'इति कर्म-राजाग्री नाम समाधिः', 'इति मण्डलराजाग्री नाम समाधिः' ये अवान्तर पुष्पि-काएँ भी आई हैं।

7. आर्यपञ्चविंशतिसाहस्रिका प्रज्ञापारमिता

इस पुटक में दो ग्रन्थ हैं—(क) अभिसमयालङ्कारप्रज्ञापारमितोपदेशशास्त्र और (ख) आर्यपञ्चविंशतिसाहस्रिका प्रज्ञापारमिता। विवरण इस प्रकार है—

(क) ग्रन्थ—अभिसमयालङ्कारप्रज्ञापारमितोपदेशशास्त्र
ग्रन्थकार—आचार्य मैत्रेयनाथ
संख्या—3/231
पत्रसंख्या—1—7, **पंक्ति प्र० प०**—13, **अक्षर प्र० पं०**—65
आधार—नेपाली कागज, **लिपि**—देवनागरी, **पूर्ण**।

प्रारम्भ

ॐ नमो रत्नत्रयाय

या सर्वज्ञतया नयत्युपशमं शान्तैषिणः श्रावकान्
या मार्गज्ञतया जगद्धितकृतां लोकार्थसंपादिका ।
सर्वाकारमिदं वदन्ति मुनयो विश्वं यया संगता
तस्यै श्रावकबोधिसत्त्वगणिनो बुद्धस्य मात्रे नमः ॥

सर्वाकारज्ञतामार्गः शासित्रा योऽत्र देशितः ।
धीमन्तो वीक्षयीरंस्तमनालीढं परैरिति ॥

अन्त

लक्षणं तत्प्रयोगस्तत्प्रकर्षस्तदनुक्रमः ।
तन्निष्ठा तद्विपाकश्चेत्यन्यः षोढार्थसंग्रहः ॥
विषयस्त्रितयो हेतुः प्रयोगश्चतुरात्मकः ।
धर्मकायफलं कर्म अन्यस्त्रेधार्थसंग्रहः ॥

पुष्पिका

इति अभिसमयालङ्कारे प्रज्ञापारमिताशास्त्रे सर्वाकारज्ञताधिकारः प्रथमः—पत्र० 2
" " " मार्गज्ञताधिकारो द्वितीयः परिच्छेदः " 3
" " " सर्वज्ञताधिकारस्तृतीयः परि० " 3
" " " सर्वाकाराभिसम्बोधि-अधिकारश्चतुर्थः " 5
" " " मूर्द्धाभिसमयाधिकारः पञ्चमः 5
" " " बुद्धबोधिसमयाधिकारः षष्ठः " 6
" " " अभिसमयाधिकारः सप्तमः " 6
" " प्रज्ञापारमितोपदेशशास्त्रं समाप्तम् ।
कृतिरियमार्यमैत्रेयनाथस्य ॥ " 7

(ख) आर्यपञ्चविंशतिसाहस्री प्रज्ञापारमिता

ग्रन्थ—पञ्चविंशतिसाहस्री प्रज्ञापारमिता

संख्या—3/231

पत्रसंख्या—7–480, **पंक्ति प्र० प०**—13, **अक्षर प्र० पं०**—65

आधार—नेपाली कागज, **लिपि**—देवनागरी, **पूर्ण** ।

प्रारम्भ

निर्विकल्पे नमस्तुभ्यं प्रज्ञापारमितेऽमिते ।
या त्वं सर्वानवद्याङ्गि निरवद्यैर्निरीक्ष्यसे ॥
आकाशमिव निर्मेयां निष्प्रपञ्चां निरक्षराम् ।
यस्त्वां पश्यति भावेन स पश्यति तथागतम् ॥
तव चार्ये गुणाढ्याया बुद्धस्य च जगद्गुरोः ।
न पश्यन्त्यन्तरं सन्तश्चन्द्रचन्द्रिकयोरिव ॥
कृपात्मकाः प्रपद्य त्वां बुद्धधर्मपुरःसराम् ।
सुखेनायान्ति माहात्म्यमतुलं भक्तवत्सले ॥

अन्त

अथ खलु भगवानायुष्मन्तं सुभूतिमेतदवोचत् किं पुनः सुभूते पूर्वम्भावोऽभविष्यत् ।

पश्चाद्भावो भविष्यति। नात्र सुभूते भावो वा नाभावो न स्वभावो न परभावः कुत एव स्वभावशून्यं भविष्यति। इति निर्वाणनिवेशनकर्म। इत्युक्तानि कर्माणि इत्युक्तो धर्मकायाभिसम्बोधः। इदमवोचद् भगवानात्तमनसा मैत्रेयप्रमुखा बोधिसत्त्वा महासत्त्वा आयुष्मांश्च सुभूतिरायुष्मांश्च शारिपुत्र आयुष्मांश्चानन्दः शक्रश्च देवानामिन्द्रः सदेवमानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति॥

पुष्पिका

1. आर्यपञ्चविंशतिसाहस्त्रिकायां भगवत्यां प्रज्ञापारमितायामभिसमयालङ्कारानुसारेण संशोधितायां सर्वाकारज्ञताधिकारः सुभूतिपरिवर्तः प्रथमः। पत्र 157
2. आर्यपञ्चविंशति............... संशोधितायां शक्रपरिवर्तो द्वितीयः। पत्र 172
3. ,, ,, ,, अन्तद्वयविशुद्धिपरिवर्तस्तृतीयः। प० 230
4. ,, ,, ,, सर्वज्ञताकारचर्याविशेषपरिवर्तश्चतुर्थः। प० 240
5. आर्यपञ्चविंशति...संशोधितायां सर्वाकाराभिसंबोधाधिकारस्तथतापरिवर्तः पञ्चमः। प० 332
6. ,, ,, ,, शिक्षापरिशुद्धिपरिवर्तः षष्ठः। प० 407
7. ,, ,, ,, एकक्षणाभिसमयाधिकारः शिक्षापरिसमाप्तीयः परिवर्तः सप्तमः। प० 423
8. ,, ,, ,, धर्मकायाधिकारः शिक्षापरिवर्तो नामाष्टमः। प० 480

अतिरिक्त

समाप्ता चेयं भगवत्यार्यपञ्चविंशतिसाहस्त्रिका प्रज्ञापारमिता सर्वतथागतजननी सर्वबोधिसत्त्वप्रत्येकजिनश्रावकाणां माता धर्ममुद्रा धर्मोल्का धर्मनाभिर्धर्मभेरी धर्मरत्ननिधानमक्षयो धर्मकोशो धर्मोऽचिन्त्याद्भुतदर्शननक्षत्रमालासदेवमानुषासुरगन्धर्वलोकवन्दिता सर्वसुखहेतुरिति। ये धर्मा०।

विवरण

इस विशाल ग्रन्थ की फोटो कापी श्री विजयराज वज्राचार्य से प्राप्त हुई है, जिसे उन्होंने राष्ट्रीय अभिलेखालय काठमांडू नेपाल से उपलब्ध किया है। इसी के आधार पर यह विवरण दिया जा रहा है।

विषय विवेचन

यह ग्रन्थ बौद्ध धर्म, दर्शन और साधना के लिये आदर्श विश्वकोष है। इसके मुख्य विषयों को 8 परिवर्तों में विभक्त किया गया है, किन्तु उनके अन्दर प्रश्नकर्ताओं ने जो प्रश्न पूछे हैं और तथागत ने जो उत्तर दिये हैं, उनके विषयों को भी अवान्तर पुष्पिकाओं में 'इति....' कह कर दर्शाया है। यद्यपि इनके मध्य में

भी कई विषय आते हैं, जिन्हें अलग से नहीं दिखाया गया है। इसमें प्रतिपादित समग्र विषयों की अवान्तर पुष्पिकाओं द्वारा निर्दिशित सूची हम यहाँ दे रहे हैं—

प्रथमपरिवर्त

षष्ठे परिवर्ते

सप्तमे शिक्षापरिसमाप्तीयपरिवर्ते

अष्टमे परिवर्ते

8. बुद्धकपालतन्त्रटीका

ग्रन्थ—बुद्धकपालतन्त्रटीका (अभयाकरपद्धतिः)

ग्रन्थकार—महापण्डित अभयाकर गुप्त

संख्या—3827/77

पत्रसंख्या—69, **पंक्ति प्र० प०**—6, **अक्षर प्र० पं०** 61

आधार—ताड़पत्र, **लिपि**—नेवारी (भुजिमोल), **पूर्ण।**

प्रारम्भ

नमः श्रीवज्रसत्त्वाय।

कल्पान्तोद्दामधामस्फुरदमितजगन्मातृलीलायितश्री-
रुन्मीलच्चित्रसेनावहलितपरमानन्दमूर्तिर्भवारिः।
भाव्यः सम्बोधिलक्ष्मीसहजसुखरसो.........स्वादुवृत्त्या
सद्वृत्तैरित्यगूढं द्रढयति पदवीमित्थमस्याभयोऽसौ॥

करोति वज्रदेवीनामादेशात् स्वप्नसंश्रयात् ।
टीकां बुद्धकपालेऽस्मिंस्तदधिष्ठानतोऽभयः ॥

·········नाद्यनाथेनाधिष्ठितो वज्रिणाऽप्यहम् ।
यतस्तदुक्तयः स्वार्थं कथयन्तीव कर्णयोः ॥

मुदं भजत सज्जनाः शुचमुदञ्चतां साधव-
स्तमस्त्रिभववर्ति रेऽपसर दूर················ ।
उदेत्यभयपद्धतेः किमपि धाम धर्मास्पदं
स्पृशत्यसमसम्पदं विमृशतश्च मध्यस्थितेः ॥

अन्त

बुद्धगुणावलिवेशावद्यादयस्तेऽपि मां क्षाम्यन्तु यतस्तेषां हेतुफलात्मको जिनवरो वैनेयेषु गोपितः । मुद्रणे चार्थः सुगूढेऽगोचरेऽस्मिंस्त·········महामेयो वज्रधरः सर्व-तन्त्रनिदानमिति ।

श्रीमद्धेरुकवीरवर्त्मविवृतेरुच्चैरुदञ्चच्छुभा
छित्वा सृसंतिनिर्वृतिभ्रममसौ तन्मण्डले मीलतु ।
लोकोऽहन्तु मुनेर्मुष्य(रमुष्य) बिभृयां मूर्तीरनन्ताः प्रति
प्राणिप्रह्वमदभ्रशर्मविदधद्धस्तप्रपञ्चं चिरम् ॥

सूरिर्विक्रमशीलस्याभयो मर्मस्पृद् गिराम् ।
राज्याब्दे रामपालस्य पञ्चविंशेऽकरोदिमाम् ॥

पुष्पिका

इति बुद्धकपालमहातन्त्रटीका अभयपद्धतिः समाप्ता । कृतिः पण्डितस्थविराभया-करगुप्तपादानामिति ।
सपादषोडशश्लोकशती सत्पण्डिता प्रमा ।
पण्डितैर्मण्डनायास्याः प्रमेव हृदि वास्तवी ॥ इति ।

विवरण

इस ग्रन्थ की फोटो प्रति एशियाटिक सोसाइटी आफ बंगाल से शान्तरक्षित ग्रन्थालय में प्राप्त हुई है, जिसके आधार पर यह विवरण दिया जा रहा है। यों ही भुजिमोल लिपि पढ़ने में कठिन होती है, इस फोटो प्रति में ताड़पत्रों के टूटने एवं स्याही अधिक होने से कई पत्रों को पढ़ना श्रमसाध्य हो गया है।

वक्तव्य

बुद्धकपालतन्त्र की मूल प्रति अभी तक उपलब्ध नहीं है। भोटभाषानुवाद अभयाकर गुप्त की टीका के साथ उपलब्ध है। अभयाकर गुप्त तिब्बती विद्वानों में उच्चकोटि के गिने जाते हैं। उनके द्वारा टीका किये जाने से बुद्धकपालतन्त्र की महत्ता स्वयं प्रतिपादित होती है। बुद्धकपालतन्त्र के उद्धरण अनेक प्रामाणिक ग्रन्थों में पाये जाते हैं। प्रस्तुत ग्रन्थ केवल टीका है, इसलिये मूल ग्रन्थ में प्रतिपादित विषयों का निर्देश इसमें अत्यन्त श्रमसाध्य है। पुष्पिकाओं में भी कोई विषय निर्देश नहीं है। केवल "पण्डिताभयाकरगुप्तकृतायामभयपद्धत्यां श्रीबुद्धकपालमहातन्त्रटीकायां प्रथमः पटलः" इसी प्रकार १४ पटल तक की पुष्पिकाएं हैं। बीच-बीच में तो केवल 'इत्यभयपद्धत्यां पञ्चमः पटलः' आदि इतना ही दिया है।

ताडपत्रों के हासिये खण्डित हो जाने से पत्राङ्क नहीं हैं, फिर भी इन्होंने अपनी तीन रचनाओं की सूचना इस ग्रन्थ में दी है—

1. "एतच्च निदानवाक्यं यथासम्भवमस्माभिः सविस्तरं **श्रीसम्पुटटीकायां** निगदितम्"
2. "अस्मत्कृत**कालचक्रावतारो**क्तन्यायेन"
3. "उक्तमस्माभि**र्मण्डलोपायिकायाम्**"

इनमें से हम दुर्लभ ग्रन्थ परिचय में 'कालचक्रावतार' का विवरण 'धीः' अं० 5, पृ० 12 में दे चुके हैं।

•

लुप्त बौद्ध वचन संग्रह

—डॉ० बनारसी लाल—

[इस शीर्षक के अन्तर्गत 'धीः' के पाँचवें अंक में कुछ लुप्त बौद्ध अपभ्रंश वचनों का संग्रह किया गया था। उसी सातत्य में प्रस्तुत अंक में अद्वयविवरण प्रज्ञोपायविनिश्चयसिद्धि, अमृतकणिका, कृष्णयमारितन्त्र, क्रियासंग्रह, खसमतन्त्रटीका तथा विमलप्रभा में उद्धृत अपभ्रंश वचनों को संगृहीत किया गया है। इसके साथ ही टीकाओं में प्राप्त संस्कृत व्याख्या को भी दे दिया गया है, ताँकि अपभ्रंश वचनों के अर्थ-प्रकाश में सहायता मिल सके।]

[1]अद्वयविवरणप्रज्ञोपायविनिश्चयसिद्धि

(1)

[2]बज्झन्ति जेण जडा परिमुंचन्ति तेण बुधा।

(2)

[3]करुणा उणे विणु भुण्डहि लग्गो।
णउ सो पावइ उत्तिमो मग्गो॥
अहवा करुणा केवलि भावइ।
सो संसारमोक्ष(क्ख) न पावइ॥
यो पुण वण्णि वियोग ण सक्कइ।
इ नउ भव नउ णिव्वाण हिं थक्कइ॥

अयमर्थः—करुणा इति। करुणारहितो यदि शून्यतायां लगति, तदासौ योगी उत्तममार्गं न लभते, बुद्धत्वमार्गं न लभत इति यावत्। अथवा शून्यतारहितो यदि करुणाकेवली भाव्यते, तदा संसारस्य मुक्तिर्न लभ्यते। यः पुनर्योगी भावद्वयं ज्ञात्वा प्रज्ञोपायराशिद्वयं योजयितुं शक्यते, एकाकारं कर्तुं शक्यते। न तद्भवं न निर्वाणमिति, भवं संसारं निर्वाणं बुद्धत्वमिति।

---

1. गुह्यादि-अष्टसिद्धिसंग्रह, पृ० 211–218
2. गु. अ सि., पृ० 217
3. गु. अ. सि., पृ. 218; यह दोहा सरहपाद के नाम से डॉ० बागची ने बैंडल द्वारा सम्पादित सुभाषित संग्रह से संगृहीत किया है। दोहाकोश, पृ० 48

अमृतकणिका नामसंगीतिटिप्पणी

(1)

[1]बज्जकवडो भित्तरे चोर महा पाविलेवे ।
सव्व मारनिद्दलिआ महासूहे भाविलेवे ॥

(2)

[2]सवे (स्व) परिवारे वेटिल नाचअ चीअ राअरें ।

(3)

[3]अणिमिस लोअण चिअ णिरोहें ।
पवण णिरुहई सिरिगुरु वोहें ॥

(4)

[4]उइ दूरे गअण मज्जो...... अद्भूआ ।
पेक्खुरे भुसुक सुण्ण अरुआ ॥

(5)

[5]पढमे आआस विसुद्धो ।
चाहंते चाहंते दिट्ठि णिरुद्धो ॥

(6)

[6]पुण्णिमचन्दा उइअऊ जब्बें ।
चिअ राअ निमिलिअ तब्बें ॥
आकढ करुणा डमरुलि बाजव ।
आज्ज देव निरालें राजअ ॥

---

1. अमृतकणिका, पृ० 195
2. अमृतकणिका, पृ० 203
3. अमृतकणिका, पृ० 226
4. अमृतकणिका, पृ० 232
5. अमृतकणिका, पृ० 232
6. अमृतकणिका, पृ० 233

(7)

[1]पञ्च महाभूआ विअ अई सामग्गीए जइअ।
पूहवि अव तेअ गंधवह गअण सज्जइअ॥
गअण-समीरण सुहवासे पञ्चेहि परिपुण्णए।
सअल सुरासुर एहु उअति बढिए सुण्णए॥

(8)

[2]एवंकार जे बुज्झिअ ते बुज्झिअ सअल असेस।
धम्मकरण्डहो सोहु रे णिअ पहुधरवेस॥

(9)

[3]सहजाणन्द च चतुक्खण णिअ संवेअण जाण।

(10)

[4]सहजाणन्द चउट्ठओ सो की बुच्चण जाई।

(11)

[5]पापपुण्ण वेणिकण भु (तु) संगेलाथा किल णिअ मण सुण्ण।

कृष्णयमारितन्त्र

(1)

[6]अडेडे किट्टयमारि गुरु रक्खलूब सहाव।
हृडे तुअ पेक्खिअ भीमि गुरु छड्डुहि कोह सहाव॥

---

1. अमृतकणिका, पृ० 240
2. अमृतकणिका, पृ० 243
3. अमृतकणिका, पृ० 277
4. अमृतकणिका, पृ० 277
5. अमृतकणिका, पृ० 285
6. कृष्णयमारितन्त्र, पृ० 78-79, तथा पृ० 128

संस्कृत छाया—अरेरे कृष्णयमारि-गुरो, रक्ष स्वरूपं स्वभावम्।
अहं तव (त्वां) प्रेक्ष्य बिभेमि गुरो त्यज क्रोधस्य भावम्॥
त्वयि नृत्यति कम्पते, स्वर्ग-मर्त्य-पातालम्।
कृष्णभिन्नाञ्जन-क्रोधमनाः, नृत्यसि त्वं वैतालम्॥
कालानि खर्वाणि प्रमाणं""बहुविधानि निर्मिमीषे रूपाणि।
वज्र-शरासन विज्ञापयामि, नृत्य त्वं महाशुभं (महासुखम्)॥

पइणच्च ते कंविअअइ सग्गमच्चपाआलु ।
किट्टभिण्णाञ्जण कोह मणु णच्चहि तुहु वे आलु ॥

काला खव्वपमाण हा बहुविह णिम्मसि रूअ ।
वज्जसरास्सई विण्णममि णच्चहि तुह महासुहरूअ ॥

ह्लीः ष्ट्रीः मन्तेण फेडहि केहु तिहुअण भान्ति ।
करुणाकोह भराडउ तह कुरु जगु पेक्खन्ति ॥

अडेडे इति । किट्टयमारीति कृष्णयमारे । हडे इति अहमेतत्प्रा(तदा)त्मिका चर्चिका । तुअ इति त्वाम् । पेक्षिअ प्रेक्षअ(क्ष्य) । भीमि बिभेमि । गुरु गुरुम् । छड्डहि त्यज । कोह सहाव कोऽयं स्वभावं(वः) ।

सग्गमच्चपाआलु इति स्वर्गमर्त्यपातालानि । किट्टभिण्णाञ्जणेति भिन्नाञ्जनवत् कृष्ण । इति वाराहीवाक्यम् ।

कालेति हे कृष्ण ! खव्वपमाणेति खर्वप्रमाणा । बहुविहेति बहुविधम् । णिम्मसीति निर्मिमीषे । रूअेति रूपम् । वज्जसरास्सई इति वज्रसरस्वती । विण्णममि विज्ञापयामि । णच्चहि तुह इति नृत्य त्वम् । महासुहरूअ इति हे महासुखरूप ।

वज्रगौरीवाक्यमाह—ह्लीः ष्ट्रीः इत्यादि । फेडहि स्फोटय । तिहुवण भान्ति त्रिभुवनस्य भ्रान्तिम् । करुणाकोह हे करुणाक्रोध । भराडउ भट्टारक । तह कुरु तथा कुरुष्व । जगु जगन्ति । पेक्खन्ति प्रेक्षन्ते ।

(2)

[1]उट्ठ भराडउ करुणाकोह ।
तिहुअण सअलह फेडहि मोह ॥

ह्रीः ष्ट्रीः मन्त्रेण नृत्य त्वं स्फोटय त्रिभुवन-भ्रान्तिम् ।
करुणा-क्रोध भट्टारक त्वां जगत् प्रेक्षतां नृत्यन्तम् ॥
(कृ० त०, पृ० १४९)

1. कृष्णयमारितन्त्र, पृ० 122 तथा 125

ए चउमार पराजिअ राउल।
उट्ठ भराडो चित्ते आउल॥

लोअणि मंतिअ अच्छसि सुण्णे।
उट्ठ भराडो लोअह पुण्णे॥

काइ तु अच्छसि सूर्णे होविंति।
बोधिसहाव लोअणिमंति॥

उट्ठेति उत्तिष्ठ। भराडउ भट्टारक। करुणाकोहेति कृपया निर्मितक्रोधः। तिहुअणेति त्रिभुवनं कामधातु-रूपधातु-अरूपधात्वाख्यम्। फेडहीति स्फोटय। एतद् वज्रचर्चिकायाः।

ए चउमारेति। एतत्क्लेशक(स्क)न्धदेवमृत्युरूपं चतुर्मारम्। पराजिअ [इति] पराजित्य, अभिभूय। राउलेति राजकुले। आउलेति व्याकुल। वज्रवाराह्याः।

लोअणि मंतिअ इति लोकानामन्त्र्य बुद्धत्वेन। सुण्णे शून्यतायां महासुखैकरसनिष्ठायाम्। लोअह पुण्णे इति लोकानामेव पुण्येन। एतद् वज्रसरस्वत्याः।

काइ तु कस्मात् त्वम्। सूर्णे (सुण्णे) होविंतीति शून्यतायामित्यर्थः। लोअणिमंतीति लोकानामन्ते। एतद् वज्रगौर्याः।

(3)

[1]णिम्मल शुद्धदेहो परमानन्द।
पुण्णस्सावेगो सम्बन्ध॥

संस्कृत छाया—उत्तिष्ठ भट्टारक करुणा-क्रोध। त्रिभुवनस्य सकलस्य स्फोटय मोहान्॥
एतावन्-मार पराजित-राजकुल। उत्तिष्ठ भट्टारक चित्तेन व्याकुल॥
लोचनाभ्यां मत्ताभ्यां आस्से शून्ये। उत्तिष्ठ भट्टारक लोकस्य पुण्येन॥
किं त्वम् आस्से शून्यस्य चित्ते। बोधि-स्वभाव लोचनाभ्यां मत्ताभ्याम्॥
(कृ० त०, पृ० 150)

1. कृष्णयमारितन्त्र, पृ० 135-136
संस्कृत छाया—निर्मलः शुद्धदेहः परमानन्दः। पुण्येन पापेन न सम्बन्धः॥
करुणाचित्तेन आस्ते सर्वम्। एको महानिधिः तथताद्रव्यम्॥
परमानन्दः सदा अ-स्वभावः। महासुख-भावेन धर्म-स्वभावः॥
न तस्य रूपं न पुण्यं न पापम्। पर ''' स्वभावः॥
(कृ० त०, पृ० 150)

करुणाचित्तं अच्छइ सव्व।
एकु महाधर्नि तथता दव्व॥
परमानन्द सई असहाव।
महासुह भावें धम्म सहाव॥
णैतहि भअण दुपूर्ण याउ।
पलअउ अत्तीणैव सभाउ॥

किमुक्तवत्य इत्याह—णिम्मलेत्यादि। णिम्मल निर्मलः, बाह्यग्राह्यापेक्षया ग्राहकाकारापेक्षित्वात्। शुद्धः परिशुद्धः, ग्राह्यज्ञानरूपापेक्षया ग्राहकत्वसम्भवात्। हो इति हवे।

कोऽसावित्याह—परमेत्यादि। आकृतिसत्त्वेनोपादेयत्वात्। परममहासुखता वेत्यपरे—

आसङ्गो नास्ति मे कश्चिदिति संचिन्त्य योगवित्।
सर्वसङ्गविनिर्मुक्तः पदं प्राप्नोत्यधीक्षकः॥
एवं गुरूपदेशेन चित्तं भ्रूनासिकान्तरे।

(4)

[1]उट्ठ भराडो करुण मनु।
पुक्कसि मुहु परिताहि॥

1. कृष्णयमारितन्त्र, पृ० 140–141. ये वचन हेवज्रतन्त्र 2.5.20–23 में प्राप्त होते हैं, जिन्हें 'धीः' 5, पृ० 31 में दिया गया है। इन्हें पुनः दिया जा रहा है, ताकि अपभ्रंश के पाठ शुद्ध हो सकें। इस दृष्टि से हेवज्रतन्त्र की टीका 'धीः' 5, पृ० 32 भी द्रष्टव्य है।

संस्कृत छाया—

उत्तिष्ठ भट्टारक करुणा–मनाः। एकवारं मां परित्राहि॥
महासुखे जाते कर्म-मलम्। शून्ये शून्यं सम्मापय (शून्यसमाधि)॥
तव विहीना म्रिये अहम्। उत्तिष्ठ त्वं हेवज्र॥
मुञ्च शून्य-स्वभावं हो। शबर्या सिद्धयतु कार्यम्॥
लोचनाभ्यां मत्ताभ्यां सुरते त्वम्। शून्ये आस्से कथम्॥
अहं चाण्डाली विज्ञापयामि। त्वया विना वहामि (?) न दिवसम्॥
ऐन्द्रजालिक उत्तिष्ठ त्वम्। अहं जानामि तव चित्तम्॥
अङ्काद् डोम्बीं विच्छेत्तुं मनः। मा कुरु करुणा-चित्त॥
(कृ० त०, पृ० 150)

मुहु सुहजा ए काम मण्डल।
स्थ र्ताहि सुवर्ण समाहि॥

तोज्ज विहूर्ण्ण मनसि हउ।
उट्ठहि तुह्र हेवज्ज॥

च्छतहि सुवर्ण सहावहा।
शबरी हसिज्ज वकज्ज॥

लापनमत्ती सुरअ यहु।
सूर्णे (सुण्णे) अच्छसि कीस॥

हवू चण्डाली विणुमसि।
तइ विश्व उहमि न दीस॥

इन्द्रा आली उठ तुह।
हवू जानमी तुहु चित्त॥

अङ्ग डोम्बी च्छेय मणु।
मा करु करुणा चित्ति॥

क्रियासंग्रह

(1)

तन्त्रान्तरे—

[1]णतं वारे गुरुवाह दुणतं वज्पइ सांसे।
सहसावत्था अमिअ रसकासु कहि जइ कीस॥

(2)

[2]इन्दीजत्थु विलीजगडणद्धा अप्पसहाव॥
सोहल सहजानन्द तराडहुड पुछ गुरुपाअ॥

---

1. क्रियासंग्रह, पृ० 178
2. क्रियासंग्रह, पृ० 179

[1]खसमतन्त्रटीका खसमा

(1)

[2]जइ के वि जइ को वि।
जइ पिउ।

(2)

[3]जन्तो द्विअ अन्तो द्विअ।

(3)

[4]दीसइ सब्बहो धर्म(म्म) सहाव।
तिहुअण सब्बहो एषु(सु) सहाव॥

दृश्यते सर्वस्य विश्ववज्रादेर्धर्म एव, अद्वयज्ञानमेव स्वभावो नार्थो न ज्ञानमिति परिच्छेदात् । अत एव त्रिभुवनं योगिनीचक्रं विश्वं वा सर्वं समग्रमेकस्वभावमेव दृश्यत इति वर्तते।

(4)

[5]आइमउं एवं विदिज्जउं तइज्जउं चतुत्थउं पञ्चमउं।

(5)

[6]धम्ममण्डलमज्जाच्छपदुमुत्तमभावण।

मण्डलं कूटागारम्, तस्य मध्यस्थं यत् पद्मोत्तमं तस्मिन् भावना।

---

1. खसमतन्त्र मूल उपलब्ध नहीं हो सका, इस लिये यह नहीं कहा जा सकता कि यह ग्रन्थ मूलतः संस्कृत या अपभ्रंश भाषा किसमें निबद्ध है। टीका में अपभ्रंश के प्रतीक बहुत से हैं। यह टीका 'संकाय पत्रिका' !, संस्कृत-विश्वविद्यालय में प्रकाशित है।
2. खसमतन्त्रटीका, संकाय पत्रिका 1, पृ० 232
3. खसमतन्त्रटीका, सं० प० 1, पृ० 238
4. खसमतन्त्रटीका, सं० प० 1, पृ० 239
5. खसमतन्त्रटीका, सं० प० 1, पृ० 240
6. खसमतन्त्रटीका, सं० प० 1, पृ० 243

(6)

[1]सुण्णा इएअकअ धम्मसमा भासन्ति मोक्ष-सुषमा-असमा।
मायानुकप्पहिं बुद्धसमा कीडन्ति सव्व खसमा असमा॥

मायासहावक अजो असमा भासन्ति तुल्लखधम्मसमा।
धम्मा अकीडखसमाणसमा असमागम(मं) स सउ वीणसमा॥

जो धम्म लोअआ आससमा कुब्बन्ति वज्ज तहिं रूवसमा।
रूवादिकामसुहअकम्पअदो जलविन्दुतुल्ल तहिं वज्जणडे(ओ)॥

वहुजोअपीट(ठ)तहिं वज्जणडे(ओ) बहुरूवधारि तहिं वज्जमडे(ओ)।
फरन्ति सत्त अघाणसमं तहिं वज्जदेइ वरधाउसमं॥

(7)

[2]पञ्चबुद्धमउडस्सअ जस्स अ तिहुअणसार।
आइबुद्धक अभावडो(हो) तस्सडो (हो) खसमपआर॥

पञ्चबुद्धमउडस्सअ जस्स अ धम्मसहाव।
वज्जसत्तपवणीअउ तिहुअण धम्मपहाव॥

वज्जसत्तपवणवान्तं पुण्ण वि होइ अनन्त।
वज्जसत्तपविज्जउ लब्भइ धम्म महन्त॥

(8)

[3]चितइ वज्जसहाव वज्जविभावइ।
एअमणा तिसृइ वज्जलजन्तउ॥

1. खसमतन्त्रटीका, सं० प० 1, पृ० 244–245

2. खसमतन्त्रटीका, सं० प० 1, पृ० 246

3. खसमतन्त्रटीका, सं० प० 1, पृ० 250

(9)

[1]सब्बसत्तपरिभाविअ किज्जई मोक्खसहाव ।

विमलप्रभा

[2]कथेइ जीवो होई बलिओ
कथेइ कम्माइ भोन्ति बलिआइ ।
जीवस्य(स्स) अ कम्मस्य(स्स) अ
पूर्व(ब्ब) णिबर्द्धा(बद्धा) इ वै(वे)राइ ॥

अस्या गाथाया अर्थमाह—कुत्रचिदिति । मोक्षविषये जीवो बलवान्, कैवल्यज्ञानबलेन । कुत्रचिच्चतुर्गतिसंसारविषये कर्म बलवत्, अज्ञानबलेन; एवं जीवस्यापि कर्मणश्च पूर्वाऽनादिकाल-निबद्धानि वैराणीति सिद्धम् ।

•

1. खसमतन्त्रटीका, सं० प० 1, पृ० 251

2. विमलप्रभा, भाग० 1, पृ० 269

बौद्ध पारिभाषिक शब्दों का अभिप्राय

—ठिनलेराम शाशनी—

[इस स्तम्भ के अन्तर्गत अब तक अनेक बौद्ध तन्त्र एवं व्याख्या ग्रन्थों से पारिभाषिक शब्दों की व्याख्याओं को संकलित किया गया है। प्रस्तुत अंक में कृष्णयमारितन्त्र एवं उसकी पञ्जिका रत्नावली तथा अभिसमयमञ्जरी से शब्दों को चयनित किया जा रहा है। ये दोनों ग्रन्थ दुर्लभ बौद्ध ग्रन्थ शोध योजना द्वारा तिब्बती संस्थान, सारनाथ से प्रकाशित हो रहे हैं।]

अञ्जनसिद्धिः (त्रिधा)

अञ्जन इति निष्पन्नकज्जले।"'अञ्जनसिद्धिरिति त्रिधा—यदि ज्वलितकज्जलेनाञ्जनं करोति, तदा त्रैलोक्यचारी न कैश्चिदपि दृश्यते, धूमायितकज्जलाञ्जने भूचरसिद्धिः, ऊष्मायितकज्जलाञ्जने सर्वजनप्रियः। कथं कृत्वा ज्वलनादि भवतीत्याह—कर्मजापप्रयोगतः। अयमर्थः—ईर्ष्यायमारियोगेन दक्षिणहस्तेनावष्टभ्य कज्जलं तावज्जप्तव्यं यावन्न ज्वलति, धूमायते, ऊष्मायते वा।
(कृ. त. टी., पृ. 20)

अतियोगः

निष्पत्तिः सर्वचक्रस्य अतियोगो विभावितः। (कृ. त., 17.10)

अनुत्तरपूजा (सप्तविधा)

पापदेशना–पुण्यानुमोदना–निर्वाणकामना–जिनचिरस्थिति–अर्थाध्येषणा–धर्मचक्रप्रवृत्त्यर्थं बुद्धयाचना-स्वपुण्यपरिणामना चेति सप्तविधानुत्तरपूजा। (अ. म., पृ.४)
एवं पूजा-पापदेशना-पुण्यानुमोदना-पुण्यपरिणामना–त्रिशरणगमन-बोधिचित्तोत्पादमार्गाश्रयणलक्षणमिति सप्तविधानुत्तरपूजा "" ""। (कृ. त. टी., पृ. 124)

अनुयोगः

तन्निष्यन्दोदयो देव अनुयोगः कथ्यते। (कृ. त., 17.9)
तन्निष्यन्दोदय इति। तस्मिन् द्रुते वज्रसत्त्वे संचोद्योत्थापितो देवः कालयमारिः।
(कृ. त. टी., पृ. 123)

अभिसमयः (पटलः)

अभीति अभितः सर्वतः सर्वभावेन समीयते साक्षाद्रूपतया प्राप्यते येनासावभिसमयः, सर्वाज्ञानप्रच्छादकत्वेन पट इव पटः, तं लाति गृह्णातीति पटलः।
(कृ. त. टी., पृ. 11)

अष्टविज्ञानम्

चक्षुःश्रोत्रघ्राणजिह्वाकायमनआलयक्लिष्टमनोविज्ञानमित्यष्टविज्ञानानां नैरात्म्यस्वरूपत्वेन श्मशानाष्टकमध्यवर्तिनीं भावयेत्। (अ. म., पृ. 8)

आर्याष्टाङ्गिकमार्गः

अविपरीतार्थप्रतिपत्तिः सम्यग्दृष्टिर्महाबला। आरब्धसत्कृत्यापरित्यागः सम्यक्संकल्पश्चक्रवर्तिनी। सत्त्वाविसंवादनवचनं सम्यग् वाग् महावीर्या। दशकुशलानतिक्रमात् कृत्यं सम्यक्कर्मान्तः काकास्या। सत्त्वाविहेठनायाजीवनं सम्यगाजीव उलूकास्या। कुशलार्थघटनं सम्यग्व्यायामः श्वानास्या। बुद्धवचनानुस्मरणं सम्यक्स्मृतिः शूकरास्या। सम्यक्समाधिर्भगवती वज्रवाराही। (अ. म., पृ. 17)

ईर्ष्या

परसम्पत्त्यसहिष्णुता ईर्ष्या। (कृ. त. टी., पृ. 3)

ईर्ष्या अमोघसिद्धिः। (कृ. त. टी., पृ. 7)

उपेक्षा

सर्वत्र प्रतिघानुनयरहितधर्मतायां स्वरसवाहितयो(या) प्रवृत्तिलक्षणामुपेक्षाम्।
(अ. म., पृ. 4)

तथैव च लोकोत्तरसुखसमन्वयवाञ्छाकारामुपेक्षाम्। (कृ. त. टी , पृ. 124)

करुणा

दुःखोद्धरणकामेणा(कामना)कारां करुणाम्। (अ. म., पृ. 4)

दुःखाद् दुःखहेतोर्वा समुद्धरणकामनालक्षणां करुणाम्। (कृ. त. टी., पृ. 123)

कर्षणम्

कर्षणमित्यानीतदेवताचक्रस्यार्घादिकं दत्त्वाऽतिसन्निहितीकरणम्।
(कृ. त. टी., पृ. 19)

कुङ्कुमम्

कुङ्कुममिति स्त्रीकुसुमम् । (कृ. त. टी., पृ. 21)

खगमुखम्

खगमुखादिति भगमार्गात् । (कृ. त. टी., पृ. 54)
खगमुखान्तस्थमिति साध्यस्त्रीयोनिमध्यस्थम् । (कृ. त. टी., पृ. 117)

खड्गयमारिः

दृष्टिपरामर्शशत्रूच्छेदकत्वात् खड्ग इव खड्गः, दृष्टिपरामर्शस्यैव यमात्मकस्यारित्वात् खड्गयमारिः । (कृ. त. टी., पृ. 3)

खड्गः

खड्गमिति वज्राभिषेकम् । (कृ. त. टी., पृ. 44)
कोशः खड्गः । (कृ. त. टी., पृ. 83)

गुरुः

गुरुर्बुद्धो गुरुर्धर्मो गुरुः संघस्तथैव च ।
गुरुर्वज्रधरः श्रीमान् गुरुरेवात्र कारणम् ॥
गुरुमाराधयेत्तस्माद् बुद्धत्वफलवाञ्छति(या) ॥ (अ. म., पृ. 30)

घण्टालक्षणम्

षड्भागैरामुखं घण्टा तत्र भागचतुष्टयम् ।
शुद्धकात् समयं कार्यमन्यदन्येन निर्मितम् ॥
तत्कम्पमध्यमाकाशं तिर्यगायामयोः समम् ।
दिगुत्पलाष्टकभागे कुम्भभागे परे सृजेत् ॥
ऊर्ध्वभागद्वयेनैव दिशि प्रज्ञामुखं भवेत् ।
मुखोर्ध्वं पूर्ववज्रार्धमिव वज्रार्धमुल्लिखेत् ॥
तथाष्टाद्यङ्गुला घण्टा वज्रानुरूपवर्तिनी ।
ईषन्मीलिताम्भोजमुखी स्यात् कापि गोमुखी ॥ (कृ. त. टी., पृ. 104)

चत्वारः ऋद्धिपादाः

धर्मश्रवणाभिलाषात्यन्तादरलक्षण-छन्दऋद्धिपादः प्रचण्डा । वीर्यानवरताभ्यासा वीर्य-ऋद्धिपादश्चण्डाक्षी । अत्यन्तविचारणा मीमांसा-ऋद्धिपादः प्रभावती । बोधिसाक्षात्करणाशयातिशयश्चित्त-ऋद्धिपादो महानासा । (अ. म., पृ. 16)

चत्वारि सम्यक्प्रहाणानि

अनुत्पन्नानां कुशलानां धर्माणामुत्पादनं यमदाढी। उत्पन्नानां कुशलानां धर्माणां संरक्षणं यमदूती। उत्पन्नानामकुशलानां धर्माणां प्रहाणं यमदंष्ट्रिणी। अनुत्पन्नानामकुशलानां धर्माणामनुत्पादनात् सम्यक्प्रहाणं यममथनी चेति।

(अ. म., पृ. 17)

चत्वारि स्मृत्युपस्थानानि

रूपस्कन्धपरिज्ञानप्रारम्भलक्षणकायानुस्मृत्युपस्थानं डाकिनी। वेदनास्कन्धपरिज्ञानप्रारम्भलक्षणवेदनानुस्मृत्युपस्थानं लामा। संज्ञासंस्कारस्कन्धमायारूपत्वाच्च धारणलक्षणधर्मानुस्मृत्युपस्थानं खण्डरोहा। विज्ञानस्कन्धस्वरूपप्रविभेदविशुद्धया चित्तानुस्मृत्युपस्थानं रूपिणी। (अ. म., पृ. 16)

चन्द्रभक्षणम्

चन्द्रभक्षणमिति नामाभिषेकत्रिकुलसमयवज्राचार्यवज्रव्रताऽऽश्वासव्याकरणानुज्ञाऽनन्तरं प्रज्ञोपायाभिषेकं गृह्णीयात्। (कृ. त. टी., पृ. 44)

ज्ञानवज्रम्

ज्ञानवज्रेणेति ग्राह्यग्राहकभावरहितचित्तेन छायामायोपमाकारेण।

(कृ. त. टी., पृ. 40)

ज्ञानसूत्रवरम्

ज्ञानं यक्षसमेदेत्यक्षरपञ्चकम्, तेन निष्पादितं सूत्रं ज्ञानसूत्रवरम्।

(कृ. त. टी., पृ. 88)

तायी

स्वदृष्टमार्गोक्तिः ताया, साऽस्यास्तीति तायी। (कृ. त. टी , पृ. 56)

तोयम्

तोयं मद्यं बोधिचित्तं वा। (कृ. त. टी , पृ. 45)

तोषणम्

तोषणं दुःखत्यागेन सुखित्वम्। (कृ. त. टी., पृ. 19)

त्रिभुवनम्

त्रिभुवनं कामधातु-रूपधातु-अरूपधात्वाख्यम्। (कृ. त. टी., पृ. 122)

त्रिशरणगमनम्

आबोधेर्बुद्धं शरणं गच्छामि । धर्मं शरणं गच्छामि । संघं शरणं गच्छामि ।
(कृ. त. टी., पृ. 123)

एषोऽहमादिबुद्धं शरणं गच्छामि द्विपदानामग्रम्, धर्मं शरणं गच्छामि समग्रं महायानम्, संघं शरणं गच्छामि अवैवर्तिकबोधिसत्त्वगणम् ।
(कृ. त. टी., पृ. 135)

दण्डयमारिः

आसंसारमशेषसत्त्वगतान्तर्ग्राहदृष्टिदोषस्योपस्प(स्फ)रणाद् दण्ड इव दण्डः । तस्या एव दृष्टेर्नाशहेतुत्वाद् यमात्मिकाया अरित्वाद् दण्डयमारिः । (कृ. त. टी., पृ. 3)

द्वेषः

अन्योन्यमप्रीतिर्द्वेषः । (कृ. त. टी., पृ. 3)

निरुत्तरहोमः

शून्यताकरुणाद्वये त्रैधातुकचक्राकारज्ञानवह्नौ तु यथोपदेशं स्कन्धादीन्धन-दहनान्निरुत्तरहोमः । (अ. म., पृ. 24)

नृकेशः

नृकेशैरिति मारितनरकेशैरर्कतूलसहितैः । (कृ. त. टी., पृ. 20)

नृतैलम्

नृतैलमिति मारितनरमांसास्थिस्नेहः । (कृ. त. टी., पृ. 20)
महातैलेन नृतैलेन । (कृ. त. टी., पृ. 76)

पञ्चबलानि

श्रद्धादीन्द्रियाण्येव प्रकर्षपर्यन्तगमनाद् बलानि । श्रद्धाबलं महाभैरवा । वीर्यबलं वायुवेगा । स्मृतिबलं सुराभक्षी । समाधिबलं श्यामादेवी । प्रज्ञाबलं सुभद्रा ।
(अ. म., पृ. 16)

पञ्चमांसम्

पञ्चमांसं गोकुदहनम् । (कृ. त. टी., पृ. 21)
पञ्चमांसेनेति गोकुदहनमांसेन । (कृ. त. टी., पृ. 80)

पञ्चमुद्रा

पञ्चमुद्रेति चक्रिकुण्डलकण्ठीरुचकमेखलम् (कृ. त. टी., पृ. 119)

पञ्चाकारम्

आकारादिस्वरैः षोडशभिर्द्विगुणितैश्चन्द्र आदर्शज्ञानमेक आकारः। ककारादिभिरधिकैः त थ द ध य ल सहितैश्चत्वारिंशता व्यञ्जनैर्द्विगुणितैरर्कः समताज्ञानं द्वितीय आकारः। बीजाक्षरेण चिह्ननिष्पत्तिश्चिह्ने च बीजमिति प्रत्यवेक्षणाज्ञानं तृतीय आकारः। ततो देवताचक्रस्फरणसंहरणं कृत्यानुष्ठानं चतुर्थ आकारः। तत्र चन्द्रादेः सर्वद्रवीभूय समरसीभावः सुविशुद्धधर्मधातुज्ञानं पञ्चम आकारः। (कृ. त. टी., पृ. 121)

पञ्चामृतम्

पञ्चामृतमिति मूविरशुमासंज्ञम्। (कृ. त. टी., पृ. 21, 28)

पञ्चेन्द्रियाणि

सत्यरत्नत्रयकर्मफलाभिसंप्रत्ययस्तत्त्वावधारणैश्वर्यादि श्रद्धेन्द्रियं वीरमती। अवश्यकर्तव्यतावधारणं वीर्येन्द्रियं खर्वरी। अविद्याप्रतिपक्षामुषितस्मरणाधिपत्यस्मृतीन्द्रियं लङ्केश्वरी। चित्ताग्रतैश्वर्यात् समाधीन्द्रियं द्रुमच्छाया। हेयोपादेयावधारणैश्वर्यात् प्रज्ञेन्द्रियमैरावती। (अ. म., पृ. 16)

पद्मयमारिः

पद्म इव पद्मः, मिथ्यादृष्टिजनानुपलेपित्वान्मिथ्यादृष्टेर्यमात्मिकाया अरित्वात् पद्मयमारिः। (कृ. त. टी., पृ. 3)

पापदेशना

यन्मया कृतं कारितमनुमोदितं वा यावत् तत् सर्वं पापं देशयामि। (कृ. त. टी., पृ. 123)

पिशुनम्

परप्रभेदकं वचनं पिशुनम्। (कृ. त. टी., पृ. 3)
पिशुनो रत्नसंभवः। (कृ. त. टी., पृ. 7)

पुण्यपरिणामना

तत्र एतत्पूजादिना यन्मे पुण्यमुपचितं तत्सर्वस्य जगतोऽर्थायानुत्तरायां सम्यक्संबोधौ परिणामयामि। (कृ. त. टी., पृ. 123)

पुण्यानुमोदना

पुनर्मया जीवितस्यार्थेन न कर्तव्यमिति संवरं कृत्वा येन यावत् कृतं तदनुमोदे। (कृ. त. टी., पृ. 123)

प्रज्ञापारमितावज्रम्

प्रज्ञापारमितावज्रमिति प्रविभक्तग्राह्यग्राहकभावेन ज्ञानं प्रज्ञा, तस्याः पारं सकलधर्मनैरात्म्यमद्वयविज्ञप्तिलक्षणं गता धीः प्रज्ञापारमिता, सैवाभेद्यत्वाद् वज्रं वज्रसरस्वतीमूर्तिः। (कृ. त. टी., पृ. 52)

बन्धनम्

बन्धनमिति प्रविष्टस्य गमननिषेधः। (कृ. त. टी., पृ. 19)

बुद्धः

बुद्धैरिति सकलपुद्गलधर्मनैरात्म्यबोधाद् धर्मकायस्वभावैः। (कृ. त. टी., पृ. 57)

बोधिचित्तोत्पादः

अहो बताहमनुत्तरायां सम्यक्संबोधौ बोधिमभिसंबोध्य यः सर्वसत्त्वानामर्थाय हिताय यावदत्यन्तनिष्ठे निर्वाणधातौ बुद्धबोधौ प्रतिष्ठापनाय।

(कृ. त. टी., पृ. 135)

भगवान्

भगवानिति—

भञ्जनं भगमाख्यातं चतुर्मारारिभञ्जनात्।
प्रज्ञाबाध्याश्च ते क्लेशास्तस्मात् प्रज्ञा भगोच्यते॥

इति वचनान्निराभासप्रकाशमहासुखस्वभावज्ञानं भगः, तद्वान् धर्मकायः। तन्निष्पाद्यतद्देवताचक्रेन्द्रो यस्याः सा। वज्रसत्त्वमूर्तिभिरित्यर्थः। (कृ. त. टी , पृ. 2)

महाकरुणा

सर्वदुःखापनयनां महाकरुणाम्। (कृ. त. टी., पृ. 135-136)

महापुरुषसमयः

संभोगात्मकोदारकायत्वेन महान्, "आधृ(ध्रि)येत्(त) पुरं यस्मात् पुरुषस्तेनाभिधीयते" इति पुरुषः, पुरं तु मण्डलचक्रम्, तस्य समयं स्मरणं यस्मादसौ महापुरुषसमयः श्रीवज्रसत्त्वः। (कृ. त. टी., पृ. 78)

महामुदिता

दिव्यसुखावियोगनियमाकारां महामुदिताम्। (कृ त. टी., पृ. 136)

महामूत्रम्

महामूत्रम् नृमूत्रम् । (कृ. त. टी., पृ. 76)

महामैत्री

सर्वसत्त्वेषु दिव्यसुखोपसंहाराकारां महामैत्रीम् । (कृ. त. टी., पृ. 135)

महायोगः

दिव्यचक्ष्वाद्यधिष्ठानं कायवाक्चित्तमेव च ॥
ज्ञानचक्रप्रवेशश्च अमृतास्वाद एव च ।
महापूजा स्तुतिश्चापि महायोग इति स्मृतः ॥ (कृ. त. 17.10-11)
(कृ. त. टी., पृ 129)

महावज्रसत्त्वम्

महावज्रसत्त्वमिति सर्वसंग्राहकत्वाद् महान्, बोधिचित्तरूपत्वाद् वज्रम्, तदुक्तम्—"यद्बोधिस्तद् वज्रम्" [इति], तत्र सत्त्वं विद्यमानत्वं तत्स्वभावत्वं यस्य तम् । (कृ. त. टी , पृ. 12)

महावज्रामृतम्

महावज्रामृतं बोधिचित्तम् । (कृ. त. टी., पृ. 76)

महाविकल्पमारणवज्रः

महांश्चासौ विकल्पश्च दुःखदुर्गत्यादिरूपः, तस्य यन्मारणं स्फोटनम्, तदर्थं वज्र इव वज्रो महाविकल्पमारणवज्रः । (कृ. त. टी., पृ. 36)

महोपेक्षा

क्लेशप्रतिपक्षमारणोपसंहारां महोपेक्षाम् । (कृ. त. टी., पृ. 136)

मारः

माराणामिति क्लेशस्कन्धदेवमृत्यूनां चतुर्णाम् । (कृ. त. टी., पृ. 5)
एतत्क्लेशस्कन्धदेवमृत्युरूपं चतुर्मारम् । (कृ. त. टी., पृ. 122)
महामार इति क्लेशादिकस्य लक्षणम् । (कृ. त. टी., पृ. 137)

मार्गाश्रयणम्

एषोऽहमनुत्तरं बोधिमार्गमाश्रयामि यदुत वज्रयानम् ।
(कृ. त. टी., पृ. 135)

मुदिता

उत्पन्नकुशलमूलभोगैश्वर्यादिष्ववियोगेच्छास्वभावां मुदिताम् । (अ. म., पृ. 4)
सर्वाकारसुखोपसंहारवाञ्छात्मिकां मुदिताम् । (कृ. त. टी., पृ. 124)

मुद्गरयमारिः

आसंसारमशेषसत्त्वगतमहाकठिनसत्कायदृष्टिनो(दृष्टेरु)पभेदकत्वाद् मुद्गर इव मुद्गरः, स चासौ तस्या एव सत्कायदृष्टेर्नाशहेतुत्वेन यमात्मिकाया अरिश्चेति मुद्गरयमारिः । (कृ. त. टी., पृ. 3)

मुद्राषट्कम्

कण्ठिकारुचककुण्डलानि शिरोमणिविभूषितम् ।
यज्ञोपवीतं भस्मेति मुद्राषट्कं प्रकीर्तितम् ॥ (अ. म., पृ. 8)
चक्रिकुण्डलकण्ठिकारुचकखट्वाङ्गमेखलाख्यपञ्च(षण्)मुद्राधराम् । (अ. म., पृ. 7)

मैत्री

सर्वसत्त्वानामेकपुत्रवत् तथैवैकरसमहासुखसंयोजनां वाञ्छात्मिकां मैत्रीम् ।
(अ. म., पृ. 4)

सर्वसत्त्वेषु एकपुत्रप्रेमतालक्षणां मैत्रीम् । (कृ. त. टी., पृ. 124)

मोहवज्रयमारिः

तत्र अभेद्यो मोहो मोहवज्रम्, तदेव महानर्थहेतुत्वाद् यम इव यमः, तस्यारिस्तस्योन्मूलकः, ग्राह्यग्राहकविचारसारतया स्वपरजस(स्व)रूपस्य प्रति मुहुरलीकत्वेन दर्शनात्, मोहस्य संक्षयात् । (कृ. त. टी., पृ. 2-3)

मोहः

तत्र अनात्मन्यात्मग्रहो मोहः । (कृ. त. टी., पृ. 3)
मोह इति वैरोचनः । (कृ. त. टी., पृ. 7)

मौलिसेकः

मौलिसेकेनेति मण्डलं प्रवेश्योदकाभिषेकानन्तरं मुकुटाभिषेकेण ।
(कृ. त. टी., पृ. 44)

यमघ्नः

यमघ्न इत्यक्षोभ्यः..... । अक्षोभ्यादयः पञ्च यमघ्ना अभिधीयन्ते । ततो मुद्राप्रस्तावे—"सर्वेषां माण्डलेयानां यमघ्नं शिरसि भावयेत्" इति तथागतानेव यथायोगं भावयेदिति । (कृ. त. टी., पृ. 7)

यमघ्नमिति अक्षोभ्यादिपञ्चकम् । ततो द्वेष-मोह-पिशुन-राग-ईर्ष्यायमारिषु यथाक्रमम् अक्षोभ्य-वैरोचन-रत्नसंभवामोघसिद्धयः शिरसि भावनीयाः । चर्चिका-

वाराहीसरस्वतीगौरीणां शिरसि वैरोचनाक्षोभ्यामिताभामोघसिद्धयो यथाक्रमम् ।
मुद्गर-दण्ड-पद्म-खड्गयमारीणां तु अक्षोभ्यवैरोचनामिताभामोघसिद्धयः ।
(कृ. त. टी , पृ. 43)

यमारिः

ग्राह्यग्राहकाकारपरिहीणमहासुखैकरसं यज्ज्ञानं तद् यमारीत्यर्थः ।
(कृ. त. टी., पृ. 134)

योगः

वज्रसत्त्वस्य निष्पत्तिर्योग इत्यभिधीयते । (कृ. त., 17.9)
सप्तविधानुत्तरपूजातः प्रभृति यावद्वज्रसत्त्वनिष्पत्तिपर्यन्तं योग इत्यर्थः ।
(कृ. त. टी., पृ. 123)

रागः

सर्वधर्मासक्तिः रागः (कृ. त. टी., पृ. 3)
राग इत्यमिताभः । (कृ. त. टी., पृ. 7)

वज्रगौरी

वज्राऽभेद्यत्वाच्छून्यतादृष्टिर्गौः, जन्मावरणप्रतिपक्षत्वात्, तां राति आदत्त इति वज्रगौरा, वज्रगौरे(रै)व वज्रगौरी, स्वार्थे इण् । (कृ. त. टी., पृ. 3)

वज्रघण्टा

वज्रघण्टा चेति घण्टाभिषेकेण । (कृ. त. टी., पृ. 44)

वज्रचर्चिका

तत्र वज्रमिव वज्रम् अनर्थजनकत्वात् क्लेशावरणम्, तस्य चर्चिका एकानेक-वियोगेन विचारिका, तस्य नाशयित्रीति यावत् । (कृ. त. टी., पृ. 3)

वज्रमार्गः

वज्रमार्गादिति पुरुषेन्द्रियरन्ध्रात् । (कृ. त. टी., पृ. 54)

वज्रम्

शून्यताज्ञानमेवाभेद्यत्वाद् वज्रम् । (अ. म., पृ. 5)
वज्रमिति कृष्णपञ्चशूकवज्रम् । (कृ. त. टी., पृ. 16)
वज्रमिति पञ्चशूकम् । (कृ. त. टी., पृ. 119)

वज्रलक्षणम्

वज्रमष्टाङ्गुलं प्रोक्तं यद्वा तद् द्वादशाङ्गुलम् ।
वज्रमष्टविधं कार्यं हेमताम्रादिसंभवम् ॥

त्रिशूकं पञ्चशूकं च नवशूकमिति त्रिधा ।
द्विधा भूयोऽपि भिद्येत सौम्यासौम्यप्रभेदतः ॥

चतुर्थं विश्ववज्रं च पञ्चशूकं चतुर्मुखम् ।
मध्यमं ग्रहणस्थानं शूकं तन्मानमन्तयोः ॥
मकरदन्तदष्टात्तं मकरान्त्रेण निर्गतम् ।
स्थूलशूलकृशाग्राग्रं तीक्ष्णक्रमनमन्मुखम् ॥
अनतिक्रान्तदिग्भागं मध्यशूकं पृथूदरम् ।
अन्तरं चतु(तू)रसानां शूकरा(कानां) मध्यशूकतः[1] ॥
वज्रानुरूपतो ह्रासवृद्धी मानप्रमाङ्गुलौ ।
यस्य च समाः शून्याः(लाः) किञ्चिदूनास्तु मध्यमात् ॥
दष्टाष्टशूलमूलाशा विकचाम्बुजमेखलाः ।
ईषदस्याधिकः कार्यो मेखला मध्यमांस(श)कः ॥
अन्योन्येन समौ शेषौ क्रमेण द्विगुणौ कृतौ ।
राजदष्टदलाम्भोजमुखमूलावली द्वयोः ॥

(कृ. त. टी., पृ. 103-104)

वज्रवाराही

वज्रमिव वज्रम् अनर्थहेतुत्वात् कर्मावरणम्, तस्य वारणं वारः, तम् आसमन्ताद् हिनोति बोधयतीति । (कृ. त. टी., पृ. 3)

वज्रसत्त्वः

वज्रम् अनुत्तरा बोधिः, तस्यां सत्त्वमाशयो यस्यासौ तथा, बोधिसत्त्व इत्यर्थः ।
(कृ. त. टी., पृ. 57)

यत्र तु वज्रधरस्य निष्पत्तिर्नास्ति, तत्र सर्वसंहारजचिह्नस्थबीजमेव वज्रसत्त्वः । यतो वज्रं चिह्नमुच्यते, तत्र यत् सत्त्वं बीजं तद्वज्रसत्त्वम् । (कृ. त. टी., पृ. 121)
वज्रमभेद्यज्ञानम्, तस्यास्तित्वं सत्त्वम् । (कृ. त. टी., पृ. 133)

वज्रसरस्वती

वज्रमभेद्यज्ञानम्, तदेव सरः, ज्ञेयावरणसां(सं)तापापनयात् । (कृ. त. टी., पृ. 3)

वशम्

वशमिति सिद्धस्य बन्धनम् । (कृ. त. टी., पृ० 19)

वेशनम्

वेशनं समयमण्डलज्ञानमण्डलयोरेकीकरणम् । (कृ. त. टी., पृ. 19)

---

1. मध्यशूकतोऽन्यशूकानामन्तरं चतू(४) रसानां(६) वा अङ्गुलानां भवेदित्यर्थः ।

षड्देवी

वाराही-यामिनी-मोह्नी-सञ्चारिणी-संत्रासिनी-चण्डिकानां षड्देवीनां मन्त्रैः स्वस्वदेवतावन्नैरात्म्येन कवचयेत् । (अ. म., पृ 10)

सप्त संबोध्यङ्गानि

समाधिरेव संबोधेः कारणम् । समाधिसंबोध्यङ्गं हयकर्णा । कौशीद्यानवकाशो वीर्यसंबोध्यङ्गं खगानना । कुशलेषूत्साहः प्रीतिसंबोध्यङ्गं चक्रवेगा । कुशलकर्मणि कर्मण्यता प्रस्रब्धिसंबोध्यङ्गं खण्डरोहा । नैरात्म्यस्वरूपेणावधारणा धर्मप्रविचय-संबोध्यङ्गं शौण्डिनी । अविस्मरणशीलता स्मृतिसंबोध्यङ्गं चक्रवर्मिणी । समाधावमनसिकारोपेक्षासंबोध्यङ्गं सुवीरा । (अ. म., पृ. 17)

समयः

समयानिति गोकुदह्नादीनि । (कृ. त. टी., पृ. 44)

समयमनुल्लङ्घनीयत्वात् । (कृ. त. टी., पृ. 88)

पूर्वमपि समयसेवाभिधानात् पुनर्यद् वचनं तस्यायमर्थः—रक्ष्यो भक्ष्यश्चैव तद् द्विधा समयः । पूर्वं भक्ष्यसमयस्योक्तत्वात् रक्ष्यसमयाभिप्रायेणेदम् ।.....समयमिति समयद्रोहः ।.....समय इति गोकुदह्नादिसेवनम् । (कृ. त. टी., पृ. 131)

समयाक्षरम्

समयाक्षरेणेति उत्पादितबोधिचित्तेन । (कृ. त. टी., पृ. 91)

समाधिचतुष्टयम्

शूरङ्गम-गगनगञ्ज-विमलमुद्र-सिंहविक्रीडितसमाधिचतुष्टयविशुद्धया चतुर्देवीपरिक्षिप्तम् । (अ. म., पृ. ७)

भारतीय दृष्टि में मन्त्र और तन्त्र

—श्री सुनीतिकुमार पाठक, पी. आर. एस.—

[प्रस्तुत निबन्ध में मन्त्र और तन्त्र विषयक सामान्य धारणा का उल्लेख करते हुए इनकी वैज्ञानिकता को शास्त्रीय प्रमाणों से सिद्ध किया गया है और शास्त्रीय दृष्टि से मन्त्र और तन्त्र का परिनिष्ठित स्वरूप स्थापित किया गया है। प्रसंगवश बीज मन्त्रों की प्रभावोत्पादकता पर भी अनेक शास्त्रीय प्रमाणों के आधार पर पर्याप्त प्रकाश डाला गया है।]

आजकल यह धारणा बलवती होती जा रही है कि मन्त्र और तन्त्र सामान्यतः जादू-टोना और आभिचारिक क्रियाओं तक ही मात्र सीमित हैं और यह सब अन्धविश्वास पर आधारित होने से पूरी तरह अवैज्ञानिक हैं।

